# शब्दकल्पद्रुमः।



अ, अकारः। आद्यस्वरवर्णः। अस्योच्चारणस्थानं कण्ठः। स तु ह्रस्वो दीर्घः प्लुतश्च भवति। इति व्याकरणं ॥ अस्य लेखनप्रकारो यथा,—

"दक्षतः कुण्डली भूत्वा कुञ्चिता वामतो गता।
ततोर्द्धसङ्गता रेखा दक्षोर्द्धा तासु शङ्करः ॥
विधिर्नारायणश्चैव सन्तिष्ठेत् क्रमतः सदा।
अर्द्धमात्रा शक्तिरूपा ध्यानमस्य च कथ्यते ॥"

इति वर्णोद्धारतन्त्रं ॥ अस्य तत्त्वं यथा,—

"शृणु तत्त्वमकारस्य अतिगोप्यं वरानने।
शरच्चन्द्रप्रतीकाशं पञ्चकोणमयं सदा ॥
पञ्चदेवमयं वर्णं शक्तित्रयसमन्वितं।
निर्गुणं त्रिगुणोपेतं स्वयं कैवल्यमूर्त्तिमान् ॥
विन्दुतत्त्वमयं वर्णं स्वयं प्रकृतिरूपिणी"।

इति कामधेनुतन्त्रं॥ अस्य पर्य्यायः।

"अः श्रीकण्ठो मातृकाद्योऽनन्तो विष्णुरनुत्तरः"।

इति वीजवर्णाभिधानं ॥ अन्यच्च।

"अः श्रीकण्ठः सुरेशश्च ललाटश्चैकमात्रिकः।
पूर्णोदरी वृत्तिमेधौ सारस्वतः प्रियम्बदः ॥
महाश्राद्धी वासुदेवो धनेशः केशवोऽमृतं।
कीर्त्तिर्निवृत्तिर्व्वागीशो नरकारिर्हरो मरुत् ॥
ब्रह्मा वामाद्यजो ह्रस्वः करसुः प्रणवाद्यकः"।

प्रणवाद्यावयव इत्यर्थः।

"ब्रह्माणी कामरूपश्च कामेशी वासिनी वियत् ॥
विश्वेशः श्रीविष्णुकण्ठौ प्रतिपत्तिर्यिरंशिनी।
अर्कमण्डलवर्णाद्यौ ब्राह्मणः कामकर्षिणी" ॥

इति वर्णाभिधानतन्त्रं ॥

अ, व्य, अभावः। अल्पः। निषेधः। अनुकम्पा। इति मेदिनी। (नञोऽयमकारः षड्विधान् नञर्थान् बोधयति। यथा,—

"तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः" ॥

इति। सादृश्ये यथ,—अब्राह्मणः ब्राह्मणसदृश इत्यर्थः। अभावे यथा—अभोजनं भोजनाभावः। अन्यत्वे यथा,—पटः अघटः, पटः घटभिन्न इत्यर्थः। अल्पत्वे यथा—अनुदरी कन्या अल्पोदरी इत्यर्थः। अप्राशस्त्ये यथा,—अधनं चर्म्मधनं, चर्म्मधनम् अप्रशस्तधनम् इत्यर्थः। विरोधे यथा—अधर्म्मः परापकारः, परापकारः धर्म्मविरोधी इत्यर्थः।)

अः, पुं, (अतति सर्व्वं व्याप्नोति इति अततेर्डः) विष्णुः। इति मेदिनी।



"अकारो विष्णुरुद्दिष्ट उकारस्तु महेश्वरः।
मकार उच्यते ब्रह्मा प्रणवेन त्रयो मताः" ॥

इति दुर्गादासधृतवचनं। (क्ली। ब्रह्म। यथा,—अ इ उ ए ओ ओम् कलाश्च मूलं ब्रह्म इति कीर्त्तितम्, इति अग्निपुराणम्।)

अनृणी, [न्], त्रि, (न ऋणी, नञ्समासः। अत्र अशब्दो न नञ्जातः, तथात्वे अनृणी इत्येव स्यात्। अपितु स्वप्रकृतिरेव ततश्च अञ्मात्रनिपातनात् नात्र सन्धिरिति ज्ञेयम्।) अनृणी। अऋणग्रस्तः। अधारी। यथा,—

"दिवसस्याष्टमे भागे शाकं पचति यो नरः।
अऋणी चाप्रवासी च स वारिचर मोदते" ॥

इति महाभारतं।

अंश, त् क विभाजने। अंशकरणे। इति कविकल्पद्रुमः। तालव्योपधः। विभाजन इति भाज त् क तु पृथक्कृत्यां इत्यस्य रूपं। अंशयति अंशापयति धनं वणिक्। इति दुर्गादासकृतधातुदीपिका ॥

अंशः, पुं, (अंश विभाजने, अदन्तचुरादिः। कर्म्मणि घञ्।) विभाजनं। तत्पर्य्यायः। भागः २। वण्टकः ३। इत्यमरः ॥ विभागः ४ भक्तिः ५। इति जटाधरः ॥ अंसशब्दो दन्त्यसान्तोऽपि। अंशांस त् क विभाजने इति कविकल्पद्रुमदर्शनात्। स्कन्धः। इति विद्याविनोदादयः ॥ (वस्त्वेकदेशः। रिक्थविभागः। चतुर्थभागः। भाज्याङ्कः। रविमूर्त्तिविशेषः। आदित्यविशेषः, यथा,—

"धाता मित्रोऽर्य्यमा शक्रो वरुणस्त्वंश एव च।
भगो विवस्वान् पूषा च सविता दशमस्तथा ॥
एकादशस्तथा त्वष्टा द्वादशो विष्णुरेव च।
जघन्यजस्तु सर्व्वेषामादित्यानां गुणाधिकः" ॥

इति महाभारतम्। वृत्तस्य षष्ठ्यधिकत्रिशततमभागः। यदुवंशीयः नृपविशेषः, यथा,—ततः कुरुवत्सः ततश्च अनुरथः ततः पुरुहोत्रो जज्ञे ततश्च अंश इति।)

अंशकं, क्ली, दिनं। इति त्रिकाण्डशेषः ॥

अंशकः, पुं, (अवश्यमंशं हरति इति अंशं हारीति कन्।) ज्ञातिः। दायादः। इति त्रिकाण्डशेषः ॥ (अल्पांशः। अल्पार्थे कन्।)

अंशभाक्, [ज्], त्रि, (अंशं भजते इति अंश+भज्+ण्विः।) अंशी। (दायादः) यथा। बौधायनः।

"स्वन्तीष्वनिरुद्धासु त्रयो वर्णा द्विजातयः।



प्रातरुत्थाय कुर्त्तव्यं देवर्षिपितृतर्पणं" ॥
निरुद्धासु न कुर्व्वीरन्नंशभाक् तत्र सेतुकृत्।

इति प्रायश्चित्ततत्त्वं॥

अंशलः, त्रि, (अंशः प्रशस्तस्कन्धः अस्ति अस्य इति अंश+लच्।) अंसलः। बलवान्। इत्यमरटीकायां रमानाथः॥ (प्रशस्तस्कन्धविशिष्टः)

अंशी, [न्], त्रि, (अंशोऽस्यास्तीति अंश+इनि।) अंशयोग्यः। वण्टकविशिष्टः। भागी। यथा याज्ञवल्क्यः।

"विभागश्चेत् पिता कुर्य्यात् स्वेच्छया विभजेत् सुतान्।
ज्येष्ठं वा श्रे[illegible]ागेन सर्व्वे वा स्युः समांशिनः" ॥

इति। सति तु पितरि पार्व्वणानधिकारात् पुत्राणां नांशिता। एवं धनिनः पौत्रस्तत्वोपरमे तदंशमात्रे प्रपौत्राणामंशिता। इति दायतत्त्वं॥

अंशुः, पुं, (अंशयति इति अंश विभाजने। मृगय्वादित्वात् कुः।) किरणः ॥ प्रभा॥ इति मेदिनी॥ वेशः॥ इति धरणी॥ सूत्रादिसूक्ष्मांशः। इति हेमचन्द्रः॥ लेशः॥ सूर्य्यः॥ इति विश्वः॥ (ऋषिविशेषः। लतावयवः। सोमलतावयवः। भागः।)

अंशुकं, क्ली, (अंशून् कायति। कै शब्दे। आतइति कः। यद्वा अंशुभिः काशते। काश दीप्तौ। अन्येष्वपीति डः।) वस्त्रमात्रं॥ सूक्ष्मवस्त्रं॥ उत्तरीयवस्त्रं॥ इति मेदिनी॥ शुक्लवस्त्रं॥ इत्यमरटीकायां रमानाथः॥ (अधोवस्त्रं।) अत्रं। तेजपात इति भाषा। इति राजनिर्घण्टः॥

अंशुधरः, पुं, (अंशूनां धरः। धरति इति धरः॥ पचाद्यच्।) सूर्य्यः॥ इति त्रिकाण्डशेषः॥

अंशुमत्फला, स्त्री, (अंशुमन्ति सूक्ष्मावयववन्ति फलानि अस्याः। अंशुमानिव फलानि अस्याः इति वा। अजादित्वात् टाप्।) कदलीवृक्षः। इत्यमरः॥

अंशुमती स्त्री, (अंशवः सन्ति अस्याः। मतुप् ङीप् च। अंशुमत्याः फलं मूलञ्च अंशुमती। अनुदात्तादेश्चेति अञ्। फलपाकमूलेषु इति लुपि युक्तवद्भावः।) सालपर्णीवृक्षः॥ इत्यमरः॥ (परदेवता।)

अंशुमान् [त्] पुं, (अंशवो विद्यन्ते अस्य इति। तदस्यास्तीति मतुप्।) सूर्य्यः॥ इति त्रिकाण्डशेषः॥ असमञ्जपुत्रः सूर्य्यवंशीयराजविशेषः॥ यथा।

"सगरस्यासमञ्जस्तु असमञ्जादथांशुमान्।
दिलीपोऽंशुमतः पुत्रो दिलीपस्य भगीरथः"॥